**Chapter Name:को हेतुः ?** *Marks :(4)*

**Quest:**

प्रश्नपाठः - कोष्ठकात् अव्ययपदानि उपयुज्य वाक्यानि पूरयत।

(तथापि , एवं ,नैव , एव ,किन्तु)

1.कूपात् जलं कर्षयन्तः ................ अतिकठिनानि कर्माणि कुर्वन्तः।.............अत्यावश्यकं अनार्जयन्तः .................भूरिणः। सुवर्णताल्यां मोदकानि .............. आवश्यकानि ............शुष्के पत्रे क्षुधां शमयितुं यत्किञ्चिदावश्यकं खलु।

**Hint:**

मूल्यनिर्णयसूचकानि -

1. एवं

2.तथापि

3.नैव

4. किन्तु

**Chapter Name:को हेतुः ?** *Marks :(8)*

**Quest:**

प्रश्नपाठः - अधः प्रदत्तं गद्यभागं पठित्वा निर्देशानुसारं उत्तरत।

सायं प्रत्यागतः सिद्धार्थः उद्यानस्य विल्ववेदिकायां तूष्णीमुपाविशत् ।तन्नेत्रे निमीलिते आस्ताम्।सः एवम् अवदत् यशोधरे अद्याहं लेकमपश्यम्।वार्धक्यं मरणं चापश्यम्।रोगं वेदनां चापश्यम्। यशोधरा प्रत्यवदत् -साधारणम् अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम् । बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सखीभिः सह विचरत्यवसरे। तेन किम् ?

वार्धक्यं रोगमरणं च साधारणमेव। सर्वैरपि दृष्टं च तत् । जीवितस्य वेदनामहमजानम्। केवलं जीवितुं कियान् क्लेशः अनुभूयते ।

1.गद्यभागे निःशब्दम् इत्यर्थे प्रयुक्तं पदं किं?

2.सिद्धार्थः कुत्र तूष्णीमुपाविशत् ?

3. सुप्रबुद्धस्य पुत्री का?

4. कियद्वारम् इत्यस्य पदच्छेदः कः?

5. संभाषणं पूयत।

सिद्धार्थः - यशोधरे! श्रूयताम्।

यशोधराः -आम् । वदतु।सिद्धार्थः -.....................।

यशोधराः - अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम् ।

सिद्धार्थः -...................................।

**Hint:**

1. तूष्णीम्।
2. विल्ववेदिकायाम्।
3. यशोधरा।
4. कियत् + वारम्।
5. उचितसंभाषणपूरणम्

**Chapter Name:को हेतुः ?** *Marks :(3)*

**Quest:**

प्रश्नपाठः - सूचनानुसारम् उत्तरं लिखत।

1.“जीवितस्य वेदनामहमजानम्" इति वाक्यं कः कं प्रति अवदत् ?

2. "वार्धक्यं रोगमरणं च साधारणमेव हि"। कस्य वचनमिदम् ?

**Hint:**

मूल्यनिर्णयसूचकानि -

1. सिद्धार्थः यशोधरां प्रति।

2. यशोधरायाः।

**Chapter Name:को हेतुः ?** *Marks :(4)*

**Quest:**

प्रश्नपाठः - यथोचितं योजयत।

| क | ख |
|---|---|
| माटम्पुकुञ्ञुक्कुट्टन् | सिद्धार्थस्य पत्नी |
| अशोकन् पुरनाट्टुकरा | महाप्रस्थानम् |
| शुद्धोदनः | को हेतुः |
| यशोधरा | कपिलवस्तुनरेशः |

**Hint:**

मूल्यनिर्णयसूचकानि

1.महाप्रस्थानं 2. को हेतुः 3. कपिलवस्तुनरेशः 4.सिद्धार्थस्य पत्नी

**Chapter Name:को हेतुः ?** *Marks :(5)*

**Quest:**

प्रश्नपाठः - मातृभाषया आङ्गलभाषया वा अनुवदत।

वार्धक्यं रोगमरणं च साधारणमेव हि।सर्वैरपि दृष्टं च तत्।यद्यपि इतरेषां वेदना न दृष्टा तथापि स्वकीयां वेदनां जानात्येव हि ।यद्यपि जरावन्तम् अन्यं वृद्धं न पश्यति।तथापि स्वकीयस्य एवमेव।

**Hint:**

मूल्यनिर्णयसूचकानि - समुचितभाषान्तरीकरणम्

**Chapter Name:को हेतुः ?** *Marks :(8)*

**Quest:**

प्रश्नपाठः - को हेतुः इति पाठाधारेण सूचनानुसारं बुद्धदेवस्य जीवितमधिकृत्य उपन्यासं लिखत।

सूचनाः - अद्याहं लोकमपश्यं , जीवितस्य वेदनामहमजानं ,अत्यावश्यकम् अनार्जयन्तः, दृष्टानां हेतुं परिचिन्तयामि।

**Hint:**उचितरूपेण लेखनम्।

**Chapter Name:को हेतुः ?** *Marks :(1)*

**Quest:**

प्रश्नपाठः -प्रदत्तानाम् प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।

1.आत्मनाथवियोगात् व्रणितात्मा का?

(यशोदा , यशोधरा , देवकी)

2.सिद्धार्थःकेन सह जनपदमगच्छत्?

(छन्देन ,कृष्णेन ,बालेन)

3.सुप्रबुद्धस्य पुत्री का?

(राधा ,यशोधरा ,मायादेवी)

4.सिद्धार्थः कुत्र तूष्णीमुपाविशत्?

(मण्डपे ,सिंहासने ,बिल्ववेदिकायाम्)

5.गात्रम् इति पदस्य समानार्थकपदं लिखत।

(नेत्रम् , शरीरम् ,चरणम् )

6. चापश्यम् - पदच्छेदं किम्?

(च + अपश्यम् , चा + अपश्यम् , च + पश्यम्)

7. केवलं जीवितुं कियान् .............अनुभूयते?

(क्लेशः ,रोगः ,सुखः)

8. दुःखस्य मूलं ................ भवति?

(सुखं ,आशा ,क्लेशं)

9.गौतमबुद्धस्य मार्गः .............।

(जैनधर्मः ,बौद्धधर्मः ,हिन्दुधर्मः)

10.शुद्धोदनस्य मायादेव्याः च पुत्रः आसीत् ..............।

(छन्दः ,बुद्धः , कृष्णः)

**Hint:**

मूल्यनिर्णयसूचकानि

1.यशोधरा 2. छन्देन 3.यशोधरा 4.बिल्ववेदिकायाम् 5.शरीरम् 6.च अपश्यम् 7.क्लेशः 8.आशा 9.बौद्धधर्मः 10.बुद्धः ।